**अखण्डतपस्** (akhaṇḍa-tapas) *adj.* of continuous penance तस्याश्चाखण्डतपसः प्रवर्तिन्युपदेशतः । पुष्पं तपोविटपिनोऽवधिज्ञानमजायत PariPar. 2. 283.

**अखण्डता** (akhaṇḍa-tā) *f.* A indivisibility, partlessness, completeness तत (बिम्बम्) इदमखण्डतामेष्यति ViviTīKa. 58. 10; एकोऽद्वितीय इति वेदवचांसि पुंसि…वैधर्म्यलक्षणमिदाविरहं वदन्ति नाखण्डतां ख इव धर्मेशताविरोधात् SāṁkhyaPraBh. 1.4 (*on* 0.0); 70.19 (*on* 1.154); 70.23 (*on* 1.154); 70.24 (*on* 1.154); आधेयतात्वस्याखण्डतया संयोगत्वादिसमशरीरत्वात् संयोगत्वाद्यवच्छिन्ने तदवच्छिन्ने वा शक्तिः कल्प्यते VyutpaVā. 117.7; B complete or total unification विभावाः…। प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् SāhiDa. 96.4; अकारहकारोभयरूपस्याप्यखण्डताप्रतीत्या तादृशस्य निर्गुणब्रह्मरूपता प्रतीयते SetuBa. 190.28; प्रपञ्चब्रह्मणोरखण्डतया…सर्वत्र कर्तृकर्मक्रियादिव्यवहारलोपः स्यात् BrahmaSūBh.(S'rī.) ii. 22.5 (*on* ii. 1.15); अखण्डतयेति । अत्यन्तैक्यापत्त्येत्यर्थः S'ivārkaMaDī. ii. 22.25 (*on* ii. 1.15)

**अखण्डताण्डव** (akhaṇḍa-tāṇḍava) *n.* ceaseless or continuous Tāṇḍava dance अतनुत तण्डुरखण्डताण्डवम् S'rīKaC. 23.19.

**अखण्डतात्पर्य** (akhaṇḍa-tātparya) *n.* the intention to convey the meaning 'the impartite one' सिद्धेऽखण्डतात्पर्ये…मानान्तराविरोधः GuruCandr. i. 326.15; i. 326.17; LaCandr. 706.36.

**अखण्डताम्बूलोपयोग** (akhaṇḍa-tāmbūlopayoga) *m.* constant use (chewing) of *tāmbūla* पथिकदारकः…मुखसरोजस्य म्लानशङ्कया बालदिनकरेणेव संयोजितमात्ममण्डलैकखण्डमखण्डताम्बूलोपयोगबद्धबहलरागमधरपल्लवं दधानः…कुमारस्य प्रकटितादरः प्रणाममकरोत् TilaMañ. 165.2.

**अखण्डतारापति** (akhaṇḍa-tārāpati) *m.* full moon यः कोटिहोमानलधूमजालैर्मलीमसीकृत्य दिशां मुखानि । तत्कीर्तिभिः क्षालयति स्म शश्वदखण्डतारापतिपाण्डुराभिः VikraDeC. 1.95 = AlaṅkāRa. 67(5)

**अखण्डताल** (akhaṇḍa-tāla) *m.* unbroken measure (in music) पारिजातलता…वर्णमात्राखण्डतालवती गाथासमन्विता BhāvPra.(S'ā.) 268.17(9)

**अखण्डतुलसीदल** (akhaṇḍa-tulasīdala) *n.* unbroken leaf of the Tulasī plant श्रीकृष्णं च परात्परम् । शश्वत्पूजितपादाब्जमखण्डतुलसीदलैः BrahmVaiP. ii. 54.166.

**अखण्डतेजस्** (akhaṇḍa-tejas) *n.* uninterrupted or constant lustre रत्नानामशेषाणां स्वयंभुवा । ददर्श … । अखण्डतेजोदीप्तानां विनिर्मितमिवाकरम् (शैलम्) SkandP. ii(1). 31.31; EI. iii. 76.18.

**अखण्डतेजोमण्डल** (akhaṇḍa-tejomaṇḍala) *n.* a complete halo of lustre तन्मध्ये…अखण्डतेजोमण्डलविशेषं नित्यानन्दमूर्तिमद्भिः परममङ्गलैः परिधीकृतम् (पञ्चमावरणम्) SiddhāSāU. 387.2(5); 389.12(6)

**अखण्डतैलधारा** (akhaṇḍa-tailadhārā) *f.* unbroken or uninterrupted stream of oil अखण्डतैलधारावदविच्छिन्नस्मृतिः पुमान् । अभ्येति परमात्मानम् BṛBrahmaS. i. 4.54; iv. 10.52.

**अखण्डत्व** (akhaṇḍa-tva) *n.* 1 indivisibility, the characteristic of being unanalysable or without parts न चाखण्डत्वेन कश्चिद्विशेषः Tattvoddyo. 3B.3; नित्यत्वेन ज्ञानादीनामखण्डत्वं सूचयति NyāySu.(Ja.) 336A.13 (*on* ii. 2.6); 383A.11 (*on* ii. 2.6); 517B.5 (*on* iii. 2.15); कथमस्य (रसस्य) स्वप्रकाशत्वं कथं वाखण्डत्वम् SāhiDa. 94.11; SāṁkhyaPraBh. 69.36 (*on* 1.154); 71.20 (*on* 1.154); 113.34 (*on* 4.17); 132.6 (*on* 5.66); अखण्डत्वं च (ज्ञानस्य) सविकल्पकप्रज्ञाविलक्षणविषयिताशालित्वम् SetuBa. 230.5; अतिदेशे तु संपूर्णमेवातिदेशस्याखण्डत्वात् BālamBha. iii. 157 (149). 24 (*on* 3.256); अत एव जातिशब्दानामखण्डत्वम्…उपपन्नम् NyāyKu. 157.5; देवदत्तादिः शक्तिविशेषरूपो वा कर्ता न भावनानिरूप्यः । घटत्ववदखण्डत्वात् VaiyāBhū. 11.18 (*on* 2); 253.15 (*on* 67); एकैव भक्तिः श्रीविष्णोः प्रीतिरित्यु(? त्यु)च्यते बुधैः । … अखण्डत्वात् SātvaT. 4.12; 2 unbrokenness, the state of being unbroken अखण्डत्वादिधर्मास्तु षण्णां चितीनां मध्ये प्रथमचितावाम्नाताः NyāyMāVi. 186.23 (*on* iii. 6.12)

**अखण्डत्वच्** (akhaṇḍa-tvac) *f.* unbroken or uncut skin सशल्कानखण्डत्वग्युक्तान् (मत्स्यानद्यात्) ManvaVi. 596.10 (*on* 5.16)

**अखण्डत्वस्वीकार** (akhaṇḍatva-svīkāra) *m.* acceptance of the view of (something) being unanalysable or indefinable प्रतियोगिताविषयतादेरखण्डत्वस्वीकारे तादृशप्रकारतावति तत्र घटादेः स्वनिवर्तकधीविषयत्वाभावान्निरूपितान्तस्थले स्वतादात्म्यसमानाधिकरणेति वाच्यम् GuruCandr. i. 167.15; कारणत्वादेरखण्डत्वस्वीकारेऽप्यन्वयव्यतिरेकज्ञानस्यैव तद्ग्राहकत्वं वाच्यम् LaCandr. 317.12; 679.28.

**अखण्डत्वहानि** (akhaṇḍatva-hāni) *f.* the loss of the indivisiblity or impartiteness अन्यव्यावृत्तिभेदात् फलममिदधतः स्यादखण्डत्वहानिः TattvMu. 4.99; अपि चात्मनः सुखमात्रत्वे प्रकाशमात्रत्वे च सुखप्रकाशाभावेनापुमर्थत्वम् । उभयात्मकत्वे चाखण्डत्वहानिः Nyāyamṛ. 638A.4.

**अखण्डत्वादि** (akhaṇḍatvādi) *adj.* (qualities or properties) such as impartiteness or indivisibility अखण्डत्वादयोऽन्यर्थचित्रिण्यादिषु सन्ति ते NyāyMāVi. 186.18 (*on* iii. 6.12); न च 'अखण्डत्वादि अज्ञानविषयः, चैतन्यं तु आश्रयः' इत्यविरोधः, अखण्डत्वादेः चिद्रूपत्वे भासमानस्य आवृतत्वायोगात्, अचिद्रूपत्वे च जडे आवरणायोगात् JñānBiPra. 2.7.

**अखण्डत्वापत्ति** (akhaṇḍatvāpatti) *f.* contingency of impartiteness or indivisibility न चाखण्डे पदानि सन्ति…। तुल्ययुक्त्या वाक्यस्याप्यखण्डत्वापत्तेश्च VaiyāBhū. 142.13 (*on* 30)

**अखण्डदण्डकारण्यभाज्** (akhaṇḍadaṇḍakāraṇya-bhāj) *adj.* 1 residing in the unbroken (extensive) Daṇḍaka forest (with reference to the tiger) अखण्डदण्डकारण्यभाजः प्रचुरवर्णकात् । व्याघ्रादिवसयाघ्रातो (?°व समाघ्रातः) गद्याद्व्यावर्तते जनः TilaMañ. 3.1; 2 which is possessed of a forest (i.e. multitude) of continuous pause-making lines (daṇḍas), TilaMañ. 3.1.

**अखण्डदण्डयात्रा** (akhaṇḍa-daṇḍayātrā) *f.* continuous march of the army संवाहय छत्रमन्नदानेनाखण्डदण्डयात्राकर्शितशम्बलमनीकदुर्बललोकम् TilaMañ. 290.22.

**अखण्डदण्डशक्ति** (akhaṇḍa-daṇḍaśakti) *adj.* having unhampered or unquestioned power of the army अखण्डदण्डशक्तिश्च … दण्डवीर्यस्तदात्मजः TriṣaS'aPuC. ii. 6.133.

**अखण्डदयिताश्लेष** (akhaṇḍa-dayitāśleṣa) *m.* full (close) embrace of the lover तासां मण्डलिताखण्डदयिताश्लेषप्रहर्षात्कुचौ रेजाते … स्वेदाम्बुनो बिन्दुभिः S'rīKaC. 15.42.

**अखण्डदिङ्मण्डल** (akhaṇḍa-diṅmaṇḍala) *n.* the whole circle of quarters मञ्जीरमञ्जुस्वनितमुखरिताखण्डदिङ्मण्डलं च ।…दर्शयन्ती सा पुष्पास्त्रस्य… वैजयन्तीव रेजे S'rīKaC. 7.66.

**अखण्डदिव्यतेजस्** (akhaṇḍa-divyatejas) *n.* uninterrupted divine lustre (सहस्रारचक्रं प्रज्वलति) तदखण्डदिव्यतेजोमण्डलाकारम् TripāMaNāU. 373.22(7); SiddhāSāU. 386.18(5)

**अखण्डदीपोद्बोध** (akhaṇḍa-dīpodbodha) *m.* (the vow of) keeping the lamp(s) continuously burning (व्रतानि) चातुर्मास्यमनुप्राप्य तदा कुर्यात् प्रयत्नतः ।…पुराणश्रवणं चैव तदर्थाचरणं पुनः । अखण्डदीपोद्बोधश्च SkandP. iv. 60.82.

**अखण्डदीप्ति** (akhaṇḍa-dīpti) *f.* continuous or perpetually burning flame (परिकल्पयामि) वर्तित्रयोपेतमखण्डदीप्त्या तमोहरम्…सुरेश मृत्युंजय वंशदीपम् MṛtyuMāPūSt. 22.

**अखण्डदृष्टि** (akhaṇḍa-dṛṣṭi) *adj.* constantly gazing on, with one's gaze fixed on मण्डकेभ्योऽखण्डदृष्टिः कान्दुकस्येव कुक्कुरः । स्पृहयालुरनुवरो मनसा केन नन्वसौ TriṣaS'aPuC. i. 2.856.

**अखण्डद्वयाग्रनिबद्ध** (akhaṇḍadvayāgra-nibaddha) *adj.* formed by the continuous line of the tips of the both (i.e. axis of latitude and of longitude) पूर्वापरयाम्योत्तरवृत्तद्वयसंयोगस्थानदत्तफ(? प)लांशमखण्डद्वयाग्रनिबद्धं का(? क्रा)न्तिवृत्तं स्यात् S'aṅkaVi.(Ā.) 213.15.

**अखण्डद्वादशी** (akhaṇḍa-dvādaśī) *f.* the twelfth day of the bright half of the month Mārgaśīrṣa, the fast undertaken on that day (which is said to perfect any imperfections of other rites) अखण्डद्वादशीं वक्ष्ये व्रतसंपूर्णताकृतम् । मार्गशीर्षे सिते विष्णुं द्वादश्यां समुपोषितः ।… यजेत् AgniP. 190.1; ज्ञेयाप्यखण्डद्वादशी तथा । मनोरथाख्या च परा भीमद्वादशिका परा । इत्येवमादयो भेदाः द्वादश्यां सन्ति केशवे PadmP. iv. 92.42; सप्तजन्मसु वैकल्यं यद्व्रतस्य कचित्कृतम् । करोत्यविकलं सर्वमखण्डद्वादशी तु तत् BhaviP. 717B.16 (iv. 79.23); व्रतमुक्तम्…। अखण्डद्वादशी नाम BhaviP. 902A.1 (iv. 208.19)

**अखण्डधर्म** (akhaṇḍa-dharma) *m.* unitary or unanalysable (i.e. indefinable) attribute घटान्यस्याखण्डधर्मस्य घटत्वादिसमानतया तादात्म्यात्यन्ताभावस्य घटाद्यप्रतियोगितया तद्भेदत्वानुपपत्तेश्च न ह्यन्याभावोऽन्यप्रतियोगिकः BhedaDhi. 83.8; 93.7; प्रमाणत्वं (? प्रमात्वं) तु बाधिताविषयकधीत्वमखण्डधर्मो वा GuruCandr. i. 106.16; अभावत्वं हि 'घटाभावो नास्ति', 'घटो नास्ती'त्यादिधीसिद्धो भावसाधारणत्वादतुच्छोऽखण्डधर्मः LaCandr. 271.12; 60.17.

**अखण्डधर्मत्व** (akhaṇḍadharma-tva) *n.* the characteristic of being an unanalysable unitary attribute शक्तेरखण्डधर्मत्वमते शक्त्या घटितत्वेनानुगमसंभवात् LaCandr. 455.32.

**अखण्डधर्ममर्याद** (akhaṇḍa-dharmamaryāda) *adj.* in which the bounds of righteousness are never broken or transgressed अखण्डधर्ममर्यादं गङ्गाकूले कृतास्पदम् । कलेरगम्यं कनकपुरं नाम्नाभवत्पुरम् KathāSaSāg. xii. 24.3.

**अखण्डधर्मरूप** (akhaṇḍadharma-rūpa) *adj.* of the nature of (i.e. forming) an unanalysable attribute निवृत्तेर्ज्ञानाधीनत्वपक्षे ज्ञानोत्पत्तिकालीनेऽप्यज्ञानतत्संबन्धयोर्निवृत्तिस्वरूपे अखण्डधर्मरूपं ज्ञानाधीनत्वमविरुद्धम् LaCandr. 165.2;